National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2024; 1(53): 218-221
© 2024 NJHSR
www.sanskritarticle.com

डा. लीनाचन्द्रा का
सहायिकाध्यापिका,
साहित्यविभागः,
रा.सं.वि.वि. तिरुपतिः

Correspondence:
डा. लीनाचन्द्रा का
सहायिकाध्यापिका,
साहित्यविभागः,
रा.सं.वि.वि. तिरुपतिः

# मनुस्मृतौ राजनैतिकविचाराः

डा. लीनाचन्द्रा का

भारतीयपरम्परानुसारं सर्वप्रथमविधेः निर्माता मनुः इति मन्यते। स ब्रह्मपुत्रः इत्यपि कथ्यते। धर्मशास्त्रस्य प्रणेतृरूपेण भारतीयसंस्कृतिं प्रति अस्य योगदानम् अक्षुण्णमिति मन्यते। मनुना वर्णितनियमः यस्मिन् ग्रन्थे उपलब्धमास्ते, सः ग्रन्थः मनुस्मृतिः इत्युच्यते । अस्य ग्रन्थस्य निर्माणकालं क्री. पू. द्वितीयशतकमिति मन्यते। अस्य ग्रन्थस्य उल्लेखः प्राचीनलेखकैः मानवधर्मशास्त्रम् इति नाम्नि अभिधीयते। जगतः उत्पत्त्यारभ्यः समाजनिर्माणं तथा समाजस्य विभिन्नवर्गस्य कर्तव्यानाम् अधिकाराणां च वर्णनं मनुस्मृतौ विद्यते। भारतीयराज्यशास्त्राय अस्य ग्रन्थस्य उपादेयता निर्विवादास्ति। मनुस्मृतेः राजधर्म नाम्नि सप्तमाध्याये राज्ञः उत्पत्तेः, धर्मस्य, कर्तव्यस्य च विवेचनं विद्यते।

## राजा

मनुस्मृतौ राज्ञः दैवी-उत्पत्तिविषये उल्लेखः लभते यत् ईश्वरः इन्द्र-पवन-सूर्य- अग्नि-वरुण-चन्द्र-कुबेरानां सारभूतांशात् राज्ञः निर्माणं करोति । ईश्वरः सर्वान् रक्षितुं राजानं निर्माति[१]। राज्ञि देवत्वमस्ति चेदपि राजा निरङ्कुशः नासीत् । राज्ञः अनेककर्तव्यानां उल्लेखः अस्मिन् अध्याये मिलति । राज्ञे उच्यते यत् राजा प्रतिदिनं प्रातः उत्थाय ऋक्- यजु-सामवेदज्ञातॄणां तथा च नीतिशास्त्रे प्रवीणानां ब्राह्मणानां च सेवां कुर्यात् । नम्रनृपस्य कदापि नाशः न भवति, अतः सः विनयी भवेत्[२]। इन्द्रियैः आसक्तं राजनं रुन्ध्यात्, यतो हि जितेन्द्रियः राजा सदा प्रजां वशे स्थापयितुं समर्थः भवति[३]। राजा स्वयं मृगया-द्यूत-दिवानिद्रा-अपरदोषवचन-स्त्रीभोग-मद्यपान-तौर्यात्रिक-वृथाभ्रमणेभ्यः उद्धारयेत्-

**मृगयाऽक्षो दिवास्वप्नः परिवादः स्त्रियो मदः।**
**तौर्यत्रिकं वृथाट्या च कामजो दशको गणः॥**[४]

मनोः मतमस्ति यत् यस्य दण्डस्य भयेन स्थावर-जङ्गमात्मकाः समस्तप्राणिनः स्वधर्मम् अनुसरन्ति, मूलतः एषः दण्डः राजा हि अस्ति । सः राजा, पुरुषः, नेता, वशासिता, चतुराश्रमाणां धर्मश्च अस्ति[५] । एषः दण्डः प्रजाः शास्ति तथा च प्रजाजनान् रक्षति । दण्डस्य भयेन जनः लोकस्य तथा परलोकस्य धर्मं पालयति[६] । राज्ञः प्रमुखकर्तव्यं प्रजानां धर्मे नियोजनमासीत् ।

## मन्त्रिपरिषद्

मनोः अनुसारं सरलकार्यमपि कदा कदापि मनुष्यः काठिन्येन करोति । अतः राजा दुष्करकार्यं एकाकी कथं कर्तुं शक्नोति । अतः राजा एकान्ते सर्वैः सचिवैः सह मन्त्रणां कृत्वा स्वहितं साधयेत्। अनेन प्रकारेण मनुः मन्त्रपरिषदः अनिवार्यतायारुपरि बलं ददाति[७] ।

मन्त्रिपरिषदः सदस्यानां संख्याविषये मनोः मतमस्ति यत् मौल (परम्परागत) - शास्त्रविद्-शूर-शुद्धकुलोत्पन्नाः सप्तः अष्टौ वा मन्त्रणाय नियुक्ताः भवेयुः-

**मौलाञ्छास्त्रविदः शूरंल्लब्धलक्षान्कुलोद्गतान् ।**
**सचिवान्सप्त चाष्टौ वा कुर्वीत सुपरोक्षितान् ॥**[८]

अन्यस्थले मनोः निर्देशः अस्ति यत् राज्यकार्याय प्रयोजनानुसारम् अमात्यान् नियोजयेत्। एते अमात्याः कार्येषु निपुणाः भवेयुः । अनेन प्रकारेण मन्त्रिपरिषदि सदस्यानां संख्याविषये मनोः कोऽपि विशेषाग्रहः न परिलक्ष्यते ।

भिन्नभिन्नमन्त्रिणां विभिन्नविभागप्रदानस्य निर्देशः मनुना दीयते। तस्य कथनमस्ति यत् वीर-चतुर-कुलमर्यदासम्पन्नेभ्यः जनेभ्यः आकरसम्बन्धीयविभागं, भीरुपुरुषेभ्यः अन्तर्निवेशीयविभागं च दद्यात्[९]। सर्वशास्त्रविशारद-पवित्र-दक्ष-कुलीनजनान् दूतरूपेण नियोजयेत्[१०]। साधारणतः अमात्यस्य अधीने दण्डविभागः, राज्ञः अधीने देशः कोषश्च, दूतस्य अधीने सन्धि-विग्रहश्च तिष्ठति[११]।

मनोः निर्देशः अस्ति यत् प्रत्येकं विशेषकार्यस्य प्रारम्भे राजा सम्बन्धितमन्त्रिणा सह परामृशेत्[१२]। मन्त्रिणा सह सन्धिविग्रहस्य, स्थानस्य, समुदायस्य, स्वदेशरक्षायाः च चिन्तनं कुर्यात्[१३]। सचिवेषु सर्वश्रेष्ठब्राह्मणसचिवेन सह षाड्गुण्यस्य (सन्धि-विग्रह-यान-आसन-द्वैधीभाव-संश्रयानां) विषये राजा मन्त्रयेत्[१४]। मन्त्रणास्थानस्य विषये मनुः कथयति यत् तत्र जड-मूक-अन्ध-वधिर-तिर्यग्योनि-अतिवृद्ध-स्त्री-म्लेच्छ रोगि-अङ्गहीनजनाः न भवेयुः । मन्त्रणायाः समयः प्रायः दिने वा मध्यरात्रौ निर्धारितः आसीत्-

**जडमूकान्धबधिरांस्तैर्योनान्वयोतिगान् ।**
**स्त्रीम्लेच्छव्याधितव्यङ्गत्यान्मत्रकालेऽपसारयेत् ॥**
**भिन्दन्त्यवमता मन्त्रं तैर्यग्योनास्तथैव च।**
**स्त्रियश्चैव विशेषेण तस्मात्तत्रादृतो भवेत् ॥**[१५]

**न्यायप्रणाली**

मनुस्मृतौ व्यवहारस्य अष्टादशमार्गानाम् उल्लेखः अस्ति, तद्यथा- ऋणदानम् अर्थात् ऋणं नीत्वा न प्रदानम्, निक्षेपः (Heritage), अस्वामी विक्रयः, सम्भूयसमुत्थानम्, दत्तस्यानपकर्म, वेतनं न प्रदानम्, सन्धेः भङ्गम्, क्रय- विक्रयसम्बन्धीयविवादः, पशुस्वामी-पशुपालकेषु विवादः, सीमासम्बन्धीयविवादः, कठोरवचनम्, दाण्ड्यपारुष्यम्, स्तेयम्, साहसम्, परस्त्रीहरणम्, स्त्री-पुरुषयोः धर्मव्यवस्था, पैतृकधनस्य विभाजनम्, तथा द्यूतञ्च[१६]।

एतेषां व्यवहाराणां निर्णयाय एकस्याः सभायाः आयोजनम् अभवत्। अस्याः सभायाः अध्यक्षं धर्मस्थः इत्युच्यते। धर्मस्थः राजा एव आसीत्[१७]। यदा राजा उपस्थितः न तिष्ठति तदा सः एकब्राह्मणम् अस्मिन् पदे नियुक्तिम् अकरोत् । एषः ब्राह्मणः त्रिभिः सभासद्भिः सह सभायां राज्ञा आदेशितकार्याणाम् अवलोकनम् अकरोत्[१८]। प्राड्विवाकः सभायां साक्षिणं निकषा वादी प्रतिवादीनाम् उपस्थितौ प्रश्नान् अपृच्छत्[१९]।

धर्मस्थः अतीव बुद्धिमान् ब्राह्मणः आसीत्। सभासद् वेदानां ज्ञाता, देशकालस्य ज्ञाता इति मन्यते[२०] । व्यवहारस्य निर्णयाय न्यायालयैः बहुसाक्षिणः प्रास्तूयन्त। मनोः अभिप्रायः अस्ति यत् साक्षी सः अस्ति, यः नेत्राभ्यां पश्यति, कर्णाभ्यां शृणोति, सत्यवादी च, कदापि धर्महीनः अर्थहीनः च न भवति-

**समक्षदर्शनात्साक्ष्यं श्रवणच्चैव सिध्यति ।**
**तत्र सत्यं ब्रुवन्साक्षी धर्मार्थाभ्यां न हीयते ॥**[२१]

मिथ्याप्रमाणदातुः उपरि मनुः विभिन्नदण्डानां प्रावधानम् अकरोत्[२२]। साक्षी उपलभ्यमानः नास्ति चेत् एतस्मिन् व्यवहारे शपथेन सत्यम् अवश्यं ज्ञातव्यम्[२३]। ब्राह्मणाय सत्यस्य, क्षत्रियाय वाहनस्य आयुधस्य च, वैश्याय गोः गर्दभस्य बीजस्य स्वर्णस्य च, शूद्राय सम्पूर्णपातकस्य शपथस्य विधानमस्ति-

**सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः ।**
**गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः ॥**[२४]

व्यवहारस्य निर्णये देशजलोकरीतीनामपि ध्यानम् अदीयत। मनोः मतानुसारं देश- रूप-कालानुसारं निर्णयप्रदानम् आवश्यकमासीत्[२५]। यैः विद्वद्भिः, धर्मेभ्यः प्रधानब्राह्मणेभ्यः च यत् दृश्यते, यत् देश-कुल-जातीनां विरुद्धं न, अतः एतेन धर्मेण सह व्यवहारस्य निर्णयः उचितः आसीत्। कोऽपि निर्णयः यदि अमात्येन प्राड्विवाकेन वा सम्यक् न निर्णीतः, तर्हि राजा स्वयं पुनर्निर्णयं कुर्यात् ।

**कोषः**

मनोः कौटिल्यसदृशः कोष सप्ताङ्गेषु एकं स्थानम् अददत् । तस्य आशयः अस्ति यत् यथा जलौकाः गोवत्सः भ्रमरः च किञ्चिद् किञ्चिदेव रक्तं दुग्धं मधु च पिवति, तथैव राजा राज्यस्य वार्षिककरं किञ्चिदेव स्वीकुर्यात्-

**यथाल्पाल्पमदन्त्याद्यं वार्योकोवत्सषदद्वाः ।**
**तथाल्पाल्पो ग्रहीतव्यो राष्ट्राद्राज्ञाब्दिकः करः ॥**[२६]

यदि राजा प्रजायाः रक्षाम् अकृत्वा अपि षष्ठभागं गृह्णाति, तर्हि राज्ञः उपरि प्रजा रुष्टा भवति [२७]।

मनोः अभिप्रायः अस्ति यत् क्रय-विक्रयव्ययं, मार्गव्ययं, भरणपोषणव्ययं, कुशलव्ययं, निर्वाहसम्बन्धियव्ययं च दृष्ट्वा हि वणिकानामुपरि करान् दापयति[२८]। राष्ट्रस्य राज्ञः च कल्याणं मनसि निधाय करान् दापयेत्[२९]। यः दुष्टनृपः ज्ञानं विना स्वदेशं शुष्यति, सः बान्धवेन सह स्वविनाशं करोति[३०]। यथा आहारावरोधेन प्राणिनां प्राणः क्षीणः भवति, तथैव राष्ट्रस्य शोषणकरणेन राज्ञः प्राणः अपि कृशः भवति-

**शरीरकर्षणात्प्राणाः क्षीयन्ते प्राणिनां यथा।**
**तथा राज्ञामपि प्राणाः क्षीयन्ते राष्ट्रकर्षणात् ॥**[३१]

राज्यस्य कोषवृद्धेः साधनरूपेण बलि-कर-शुल्क-दण्ड-भागश्च मुख्यः इत्युच्यते[३२]। बलिः धान्यादीनां षष्ठभागः, करः ग्राम-पुरवासिभ्यः ग्रहणयोग्यधनं शुल्कः, जल- स्थलमार्गात् ग्रहणयोग्यधनं द्रवश्च आसीत्। एतेषु दण्डेण व्यवहारेण च ग्रहीतुं धनमपि अन्यतमम् आसीत्। फल-फुल-शाक-तृणञ्च यत् प्रतिदिनं ग्रहणयोग्यम्, तद् धनं भागः इत्युच्यते।

**दुर्गं राष्ट्रश्च**

मनुः दुर्गं राष्ट्रञ्च सप्ताङ्गेषु पृथक्तया स्थानं दत्वा एतयोः महत्त्वम् अवर्धत। प्रायः एतेषां महत्त्वं सर्वभारतीयविचारकाः स्वीकुर्वन्ति। मनोः मतमस्ति यत् यस्मिन् देशे जल- तृण-पवन-रौद्रं च पर्याप्तमस्ति, यत् स्थानं रोगेण उपद्रवेन च रहितमस्ति, यत् फलेन फुलेन लतया वृक्षेण च मनोरमम् अस्ति, यत्र भद्रपुरुषाः धर्मात्मा वीरपुरुषाः च निवसन्ति, यत्र कृषीणां वाणिज्यानां धान्यानाञ्च अधिकता परिलक्ष्यते तस्मिन् स्थाने राजा वसेत्-

**जाङ्गलं सस्यसम्पन्नमार्यप्रायमनाविलम् ।**
**रम्यमानतसामन्तं स्वाजीव्यं देशमावसेत् ॥**[३३]

अनेकदुर्गानां वर्गीकरणं मनुना अनेन प्रकारेण कृतं यत्- धन्वदुर्गम् इति यस्य चतुर्पार्श्वे तथा दशकोशपर्यन्तं मरुस्थलं भवति। महीदुर्गम् इति यत् इष्टिकया प्रस्तरेण च निर्मितं, यत् व्यासस्य अपेक्षया द्विगुणम् उपरि भवति तथा भित्त्या चतुर्पार्श्वे आवृतं तिष्ठति। जलदुर्गम् इति जलेन चतुर्पार्श्वे आवृतं भवति। वार्क्षदुर्गम् इति यत् परितः बृहत्-वृक्षः कण्टकयुक्तलता च तिष्ठति । नृदुर्गम् इति यत् गजेन अश्वेन रथेन च युक्तं, सैनिकेन रक्षितं भवति । गिरिदुर्गम् इति यस्य निर्माणम् पर्वतस्य उपरि बभूव। राजा एतेषु किमपि एकदुर्गम् आश्रित्य स्वनगरम् अनुवसेत् । एतेषु गिरिदुर्गं सर्वश्रेष्ठमिति उच्यते-

**धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव वा ।**
**नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत्पुरम्॥**
**सर्वेण तु प्रयत्नेन गिरिदुर्गं समाश्रयेत् ।**
**एषां हि बाहुगुण्येन गिरिदुर्गं विशिष्यते॥**[३४]

दुर्गम् आयुधेन धनधान्येन ब्राह्मणेन वाहनेन कारिगरेण यन्त्रेण इन्धनेन च परिपूर्णं भवेत्[३५]। एतस्मिन् दुर्गे सुन्दरतया पर्याप्ततया च स्त्रीगृहः देवालयः शस्त्रागारः अग्निशाला च भवेत् । ऋतुनामनुसारम् एतद् दुर्गं सर्वैः फुलफलैः युक्तं भवेत्। वृक्षः स्वच्छजलं च अत्र भवेत्, गभीरभित्त्या च सुरक्षितं भवेत्[३६]।

राष्ट्र सुचारुरूपेण परिचालनाय मनुना व्यवस्था दीयते यत् एकग्रामस्य, दशग्रामाणां, विंशतिग्रामाणां, शतग्रामाणां च पृथक्तया अधिपतिः भवेत्[३७]। अनेन प्रकारेण ग्रामः संघठनस्य सर्वस्मात् लघुघटकः अस्ति । अस्य अधिकारी ग्रामिकः इति कथ्यते, सः भोगस्य समस्तोपादानेषु राज्यांशं सञ्चयं कृत्वा दशग्रामाणाम् अधिपतिं निकषा अप्रेषयत्[३८]। ग्रामस्य अशान्तेः अथवा विघ्नस्य सूचनाम् एनं निकषा प्रेषयति स्म[३९]। दशग्रामाणाम् अधिपतिः दश-ग्रामपतिः, विंशतिग्रामाणाम् अधिपतिः विंशतीशः अथवा विंशी, शतानां शतेशः अथवा शताध्यक्षः, सहस्रग्रामाणाम् अधिपतिः सहस्रपतिः अथवा सहस्राधिपतिः इत्युच्यते[४०]। एतेषाम् अधिकारिणां वेतनस्य विषये मनुना उच्यते यत् दशग्रामपतेः एककुलं, विंशतीशस्य पञ्चकुलं, शतेशस्य एकग्रामं, सहस्रपतेः एकपुरं च भोगस्य अधिकारः अस्ति-

**दशी कुलं तु भूञ्जीत विंशी पञ्चकुलानि च।**
**ग्रामं ग्रामशताध्यक्षः सहस्राधिपतिः पुरम् ॥**[४१]

मनुस्मृतौ सर्वार्थचिन्तकस्य अपि उल्लेखः विराजते, यस्य नियुक्तिः प्रत्येकस्मिन् नगरे अभवत्। अस्य कर्तव्यं स्व-अधीनस्य प्रजायाः समस्तार्थानां विषये चिन्तनम्, तथा तस्य स्वसिद्ध्यये सततं प्रयत्नम् अकरोत्[४२]।

**सेना**

सेनायाः विभिन्नाधिकारिणां कर्मचारिणां च पदानां नामोल्लेखः मनुस्मृतौ न मिलति। सेनाविभागः अमात्यस्य अधीने आसीत्[४३]। सेनापतिः मन्त्रिपरिषदः सदस्यः आसीत्। तस्य अधीने षट्-प्रकाराः सेनाः आसन्- रथः अश्वः हस्तिः नाविकः पदातिकः भारवाहकश्च। एतेषु प्रत्येकाधिपतिः बलाध्यक्षः इत्युच्यते । सेनायाः समूहः गुल्मः, तथा च अस्याधिपतिः गुल्मपतिः इत्युच्यते ।

मनोः अभिप्रायः अस्ति यत् विजयाकाङ्क्षी राजा दुष्टपुरुषं सामादि-उपायेन वशं कुर्यात्[४४]। विरोधी आदौ साम-दान-भेदनाम्ना उपायेन वशे न भवति चेत् तर्हि तं लघु- गुरुदण्डेन वशं कुर्यात्[४५]। यथा कृषकः कर्षणेन सह तृणादिमपि उत्तोलनं कृत्वा धान्यं रक्षति, तथैव राजा दुष्टानां हनने कृत्वा देशं रक्षेत्-

**यथोद्धरति निर्दता कक्ष धान्यं च रक्षति ।**
**तथा रक्षेन्नृपी राष्ट्र हन्नाञ्च परिपन्थिनः ॥**[४६]

युद्धाय सेनायाः प्रस्थानविषये मनोः मतमस्ति यत् स्वदुर्गस्य स्वदेशस्य च रक्षायाः पर्याप्तप्रबन्धं कृत्वा, यात्रायाः उपयुक्तायुधं वाहनं च गृहीत्वा, गुप्तचराणां नियतं कृत्वा च षट्-बलैः सह शनैः शनैः शत्रोः पुरे प्रविशेत्[४७] । समयानुसारं दण्ड-वराह-मकर-शकट-सूच्य-गरुड-पद्मव्यूहञ्च रचयेत्[४८] ।

मनुस्मृतौ सैन्यव्यवस्थायाः युद्धनीतेः चापि वर्णनं मिलति। अन्यं राज्यम् अथवा देशं जित्वा तत्र देवान् धर्मप्रधानब्राह्मणान् च भूमि-स्वर्णादयः दानेन सम्मानं पूजनं च कुर्यात् । स्वामिभक्तिना यः अस्माकम् उपकारम् अकरोत्, तस्य अहं क्षमां करोमि, अधुना निर्भयं भूत्वा सुखेन व्यापारं करोतु इत्येतस्य घोषणां कुर्यात्[४९]।

**उपयुक्तग्रन्थसूची**

१. **मनुस्मृतिः -**पण्डितरामेश्वरभट्ट व्याख्या – कुकुम्बर् पब्लिकेषन्स्- २००१.

२. **मनुस्मृतिः-**तुलसीराम स्वामी – भाष्यकारः, रञ्जन् पब्लिकेषन्स्-१९९८.
३.**The Manusmriti –** Dr. Surendra Kumar (Narrator & Translator), Govindam Hasanand – 2022.

**पादटिप्पणिः**

१. म. स्मृ. ७.३४
२. तत्रैव. - ७.३७-३९
३. तत्रैव - ७.४४
४. तत्रैव- ७.४७
५. तत्रैव. - ७.१५-१७
६. तत्रैव - ७.१८
७. तत्रैव- ७.५५-७
८. तत्रैव- ७.५४
९. तत्रैव ७.६२
१०.तत्रैव- ७.६३
११.तत्रैव- ७.६५
१२.तत्रैव.- ७.५९
१३.तत्रैव. - ७.५६
१४.तत्रैव- ७.५८
१५.तत्रैव- ७.१४९-१५०
१६.तत्रैव - ८.३-७
१७.तत्रैव. - ८.२३.५७
१८.तत्रैव - ८.९
१९.तत्रैव. - ८.७९
२०.तत्रैव - ८.९
२१.तत्रैव.- ८.४५
२२.तत्रैव - ८.७४
२३.तत्रैव. - ८.११८-९
२४.तत्रैव. - ८.१०९
२५.तत्रैव- ८.११३
२६.तत्रैव.- ८.४५
२७.तत्रैव- ७.१२९
२८.तत्रैव.- ९.२५४
२९.तत्रैव. - ७.१२७
३०.तत्रैव.- ७.१२८
३१.तत्रैव - ७.१११
३२.तत्रैव. - ७.११२
३३.तत्रैव- ८.३०७
३४.तत्रैव - ७.६९
३५.तत्रैव- ७.७०-७१
३६.तत्रैव - ७.७५
३७.तत्रैव. - ७.७६
३८.तत्रैव- ७.११५
३९.तत्रैव - ७.११८
४०.तत्रैव. - ७.११६
४१.तत्रैव - ७.११५
४२.तत्रैव - ७.११९
४३.तत्रैव- ७.१२१
४४.तत्रैव.- ७.६५
४५.तत्रैव - ७.१०७
४६.तत्रैव- ७.१०८
४७.तत्रैव- ७.११०
४८.तत्रैव- ७.१८४-५
४९.तत्रैव- ७.१८७